# सप्तमोऽध्यायः

## नवांशस्य समीक्षात्मकं मूल्याङ्कनं

## फलादेशस्याधारभूतसिद्धान्ताः च नवांशमूल्याङ्कनम्

**अध्यायः-७ नवांशस्य समीक्षात्मकं मूल्याङ्कनं फलादेशस्याधार-भूतसिद्धान्ताः च**

**नवांशमूल्याङ्कनम्**

ज्योतिषशास्त्रे नवांशः अत्यन्तमहत्वपूर्णः वर्गः वर्तते। दक्षिणभारते राशिवर्गं तथा नवांशं समानमहत्वं धारयतः । भूतकाले प्रत्येकरचानाकारेण नवांशवर्गस्य प्रयोगः स्वस्यपुस्तके कृतो वर्तते । ज्योतिषशास्त्रस्य विख्यातलेखकेभ्यः नवांशाधारित पुस्तकानि लिखितानि । उदाहरणानि यथा – जैमिनिपद्धतिः , कालचक्र–दशा- सर्वतोभद्रचक्र इत्यादि। नवांशाधारितं गद्यं किदृक् विशालं वर्तते तस्य ज्ञानं तत्रस्थश्लोकाणां समन्वयेन ज्ञायते । ग्रन्थेस्मिन् ३०००सहस्राधिकसंख्याकाः श्लोकाः सन्ति।

मन्त्रेश्वरानुसारं बहुनां लेखकानां मतेषु नवांशवर्गपरिणामं राशिवर्गस्य समानमेव भवति। केषाञ्चित् लेखकानां मते नवांशवर्गः – राशिवर्गात् अत्यधिकं महत्वपूर्णः वर्तते।

यथा –

**"स्वोच्चे नीचांशगे दुःखी नीचे स्वोच्चांशगे सुखी"**

यदि एतेषां नवांशसिद्धान्तानां ध्यानपूर्वकमध्ययनं तथा प्रयोगः क्रियते चेत् जातकस्य जीवनसम्बन्धितघटनानां भविष्यकथनं विना भ्रमेन कर्तुं शक्यते। अस्य सन्दर्भे भागप्रथमे व्याख्यापितसिद्धान्तानां ध्यानपूर्वकमध्ययनं तथा कुण्डल्याम् एतेषां सफलप्रयोगः आवश्यकः भवति।

प्रत्येकनवांशः तथा प्रत्येकनक्षत्रस्य एकचरणस्य सम्पूर्णः योगः ३ अंशाः २० कला च भवन्ति। अतः नवांशवर्गः षोडशवर्गेषु महत्वपूर्णः वर्तते। दक्षिणभारते

कोऽपि ज्योतिर्विद: राशिवर्गस्याध्ययनं नवांशवर्गेण विना न करोति । बहवः ज्योतिर्विदाः नवांशवर्गं राशिवर्गात् अधिकः महत्वपूर्णं कथयति, कारणं राशिवर्गे नीचस्थग्रहाः नवांशे उच्चस्थाः भवति, ते शुभफलशुभपरिणामदायकाः भवन्ति ।

## ७.१ मेषादिराशीनां स्वराधारेण नवंशानुरूपफलकथनम् :-

यथा स्वरशास्त्रे ग्रहास्वरः भवति तथैव राशिस्वरो अपि भवति । राश्याधारेणैव नवांशानुरूपं स्वरानामुल्लेखो अपि कृतो विद्यते । अस्मिन् विषये कथितं वर्तते यत् मेषराशे: नवनवांशाः, वृषभराशेः नवनवांशाः, तथा च मिथुनराशेः षड्नवांशाः इति अस्वरस्य आधिपत्यं भवति । पुनः तत्र मिथुनराशेः अवशिष्टाः नवांशाः, कर्कराशेः नवनवांशाः, सिंहराशेश्च नवनवांशाः इति इकारस्य आधिपत्यं भवति । कन्याराशेः नवनवांशाः, तुलाराशेः नवनवांशाः तथा च वृश्चिकराशेः त्रयो नवांशाः उकारस्य आधिपत्यं भवति । पुनः वृश्चिकराशेः अवशिष्टाः षड्नवांशाः, धनुराशेः नवनवांशाः, मकरराषेश्च षड्नवांशाः, एकारस्य आधिपत्यं भवति । मकरराशेः त्रयो अवशिष्टाः नवांशाः, कुम्भराशेः नवनवां शाः, मीनराषेश्च नवनवांशाः ओकारस्य आधिपत्यं भवति । एवमेव प्रकारेण नवांशानुरोधेन राशीनां स्वराणां विभाजनं कृतमस्ति । यथा हि तत्र कथितम् –

मेषवृषावकारे च मिथुनाद्याः षडंशकाः । मिथुननांशत्रयं चैवमिकारे सिंहकर्कटौ ।।

कन्या तुला उकारे च वृश्चिकाद्यास्त्रयोऽशंकाः । एकारे वृश्चिकान्त्यांशाश्चापः षट् च मृगादिमाः ।।

अंशास्त्रयो मृगस्यान्ताः कुम्भमीनौ तथौस्वरौ । एवं राशिस्वराः प्रोक्ताः नवांशैकक्रमोदयाः ।।

मानवः शरीरे श्वास-निःश्वासमाध्यमेन जन्मकालादारभ्य मृत्युपर्यन्तम् अहर्निशं स्वरसन्धानं भवति। स्वरानुसारेण जीवने शुभाशुभकर्मणां कालः, लाभा-लाभः, जय-पराजयः, भूत-भविष्यत्-वर्तमानसम्बन्धिताः घटनाः इत्यादि विषयाः अपि ज्ञातुं शक्यन्ते । अतः कालान्तरेण स्वरशास्त्रस्य ज्योतिषशास्त्रे अन्तर्भावः जातः ।

साधारणतया सूर्यात् केतुपर्यन्तं नवग्रहाणां मेषादि द्वादशराशिषु तथा च लग्नतः व्ययपर्यन्तं द्वादशभावेषु स्थितिवशात् जन्मकुण्डली निर्मीयते । कस्मिन् कस्मिन् भावे का-का राशिः, कः-कः ग्रहः तथा चैतेषां द्वादशभावेषु ग्रहराशीनाञ्च किं फलं वर्तते, कीदृशं फलं वर्तते वाऽस्य ज्ञानमाचार्यैः केचन फलादेशस्याधा-रभूतसिद्धान्ताः प्रतिपादिताः। ते सिद्धान्ताः द्विविधा –

१ सामान्यसिद्धान्ताः

**२ विशिष्टसिद्धान्ताश्चेति।**

**७.२ फलादेशस्य सामान्यसिद्धान्ताः**

- १ कः भावेशः ?
- २ भावेशः कस्मिन् भावे स्थितोऽस्ति।
- ३ केन ग्रहेण सह।

- ४ तस्य गृहे कः ग्रहः अस्ति ।

- ५ येन ग्रहेण सः भावेशः स्थितः तेन सह तस्य क: सम्बन्धः ।

- ६ भावेशः यस्मिन् स्थाने (भावे) तस्य गृहस्य स्वामिना सह कः सम्बन्धः भावेशस्य ।

- ७ भावेशं कोऽवलोकयति ।

- ८ तं भावं को पश्यति ।

- ९ यो ग्रहः यद्भावे स्थितः तस्य भावेशेन सह कः सम्बन्धः ।

- १० भावेशस्य द्वितीयराशि कस्मिन् द्वितीये गृहे ।

- ११ भावेशस्य कीदृशी स्थिति:- उच्चस्थिति: नीचस्थिति: वा ।

**७.३ फलादेशस्यविशिष्टसिद्धान्ताः**

- १ उच्च, मूलत्रिकोण, स्वगृही, मित्रगृहं गताः वा सर्वे ग्रहाः शुभफलदायकाः ।

- २ यस्मिन् भावे शुभग्रहस्य दृष्टिर्भवेत् सो भावः शुभदः । पापग्रहदृष्ट्या सोऽशुभः ।

- ३ सर्वे ग्रहाः स्वभावात् गृहात् वा अष्टम स्थाने गताः तर्हि न शुभफलदायकाः।

- ४ षष्ठेशाष्टमेशश्च न शुभफलदायकौ ।

- ५ षष्ठेशाष्टमेशश्च यद्भावे गच्छतः तस्य हानिः ।

- ६ यदि अष्टमेशः लग्नेशोऽपि स्यात् तर्हि शुभफलदायकः ।

यथोक्तं लघुपाराशर्याम् –

**“भाग्यव्ययाधिपत्येन रन्ध्रेशो न शुभप्रदः,**

**स एव शुभसन्धाता लग्नाधीशोऽपि चेत्स्वयम् ।”**

- ७ पापग्रहाः स्वभावात् तृतीयस्थाने गताः शुभदाः । शुभग्रहाः स्वभावात् तृतीयस्थाने गताः अशुभदाः ।

- ८ द्वितीयव्ययेशौ सर्वदा परेषां साहचर्यतः अथवा स्थानान्तरानुगुण्येन फलदायकौ । यथोक्तं पाराशरेण-

**“लग्नाद्व्ययद्वितीयेशौ परेषां साहचर्यतः ।**

**स्थानान्तरानुगुण्येन भवतः फलदायकौ ।।”**

- ९ एकादशस्थाने (भावे) सर्वे ग्रहाः शुभफल दायकाः ।

- १० यदि सूर्यचन्दावष्टमेशः भवेतां तर्हि नाशुभौ ।

- ११ शनिशुभदोऽष्टमस्थाने चेत्तदा ।

- १२ गुरु: सदा षष्ठे स्थाने शुभदः ।

- १३ एकाकी गुरुः, प्रथम, पञ्चम, सप्तमस्थाने सदैव हानिकरः ।

- १४ कोऽपि ग्रहः यदि केन्द्रत्रिकोणयोः स्वामी स्यात्तर्हि विशेषफलदायकः ।

- १५ शुभग्रहाः यदि केन्द्राधिपाः भवेयुः तर्हि न शुभकारकाः । यथोक्तं पाराशरेण-

**“न दिशन्ति शुभां नृणां सौम्याः केन्द्राधिपा यदि ।”**

- १६षष्ठेशः गोचरे यस्मिन् भावे गच्छति तद् भावे सम्बन्धिसुखं ददाति।

- १७ अष्टमस्थाने शुक्रः द्वादशस्थाने शुक्रश्च सदैव शुभदः ।

- १८ राहुकेतू सदैवाकस्मिक कार्यं कुरुतः ।

- १९ चतुर्थेशः पञ्चमस्थाने पञ्चमेशः चतुर्थस्थाने अथवा नवमेशः दशमस्थाने, दशमेशः नवमस्थाने तर्हि विशेषफलदायकाः ।

- २० नैसर्गिकपापग्रहाः यदि केन्द्राधिपाः भवेयुः तर्हि नाशुभफलदायकाः ।

- २१ द्वितीयभावः, द्वितीयेशः, सप्तमभावः सप्तमेशः च मारकस्थानौ ।

 २२ सर्वे ग्रहाः स्वदशायां स्वान्तरदशायां च न फलं ददति अपितु मित्रग्रहस्य दशायां शुभग्रहस्य दशायां वा शुभफलं दिशन्ति ।

 २३ प्रथमकेन्द्रेशात् द्वितीयकेन्द्रेशः, द्वितीयात् तृतीयः, तृतीयात् चतुर्थकेन्द्रेशः बलयुक्तः ।

 २४ प्रथमत्रिकोणेशात् द्वितीयत्रिकोणेशः प्रबलः ।

 २५ प्रथमत्रिषडायधीशात् द्वितीयः, द्वितीयात् तृतीयः त्रिषडायधीशः प्रबलः। यथोक्तं लघुपाराशर्याम्- “प्रबलाश्चोत्तरोत्तरम्” ।

 २६ सप्तमेशः यदि गुरुः, शुक्रः, बुधः अथवा चन्द्रो भवेत्तर्हि प्रबलमारकाः भवन्ति, गुरुतः न्यूनः शुक्रः, तस्मात् बुधः, तस्मान्न्यूनश्चन्द्रो भवति । यथोक्तं पाराशरेण-

**“केन्द्राधिपत्यदोषस्तु बलवान् गुरुशुक्रयोः ।**

**मारकं त्वेऽपि च तयोः मारकस्थानसंस्थितिः ।।**

बुधस्तदनु चन्द्रोऽपि भवेत्तदनु तद्विधः ।”

 २७ तमौ ग्रहौ यदभावगतौ अथवा यद् भावेशयुतौ तदैव फलदायकौ।

 २८ लग्नेशः यदि षष्ठाष्टमस्थाने च भवेत् तदा सदैव स अशुभदायकः ।

 २९ यदि राहुः द्वितीयभावेऽथवा नवमभावे भवेत्तर्हि धनागमः भाग्योदयश्च स्वस्थानात् दूरं भवति ।

  ३० अस्तग्रहाणां भावानां वा फलं शून्यो भवति।

(अस्तग्रहाः सूर्यस्य (दीप्तांशायां)सामीप्यकारणत्वेन भवन्ति) यथा- (चन्द्रः १२० अंशपर्यन्तं, भौमः १६० अंशपर्यन्तं, बुधः १३० अंशं यावत्, गुरुः ११० अंशं यावत्, शुक्रः ९० अंशं यावत्, शनिः १५० अंशपर्यन्तं भवति)।

  ३१ कस्यापि भावे यः ग्रहस्तिष्ठति तदपेक्षया यः ग्रहः तं भावं पश्यति स भवति प्रभावदायकः।

  ३२ नैसर्गिकपापग्रहः शुभग्रहो वा स्यात् परं यदि त्रिकोणाधिपो भवेत् तदा स शुभफलदायकः।

  ३३ तृतीयेषः तृतीये, षष्ठेशः षष्ठस्थाने, एकादशेशः एकादशभावे, यदि भवेयुस्तदा ते शुभकारकाः।

  ३४ शुभग्रहस्य (योगकारकस्य) महादशायां च पापग्रहस्य (आकारकग्रहस्य) अन्तर्दशायां प्रारम्भे शुभफलमुत्तरार्द्धेऽशुभफलम्।

  ३५आकारक(पापग्रह)स्य महादशायां कारक(शुभ)ग्रहास्यान्तर्दशायां प्रारम्भेऽशुभफलमन्ते च शुभफलं मिलति।

इत्थं सामान्यतया सूर्यादिग्रहाः जन्मकाले जन्मकुण्डल्यां यस्मिन् यस्मिन् भावे तिष्ठन्ति तस्य तस्य भावस्य फलं ग्रहाणां स्थितिवशात् यद् भवति तद् ग्रहाणां भावफलं जातकग्रन्थेषु (होराशास्त्रे) भिन्नभिन्नाचार्यैः स्वस्वमतानुसारेण प्रतिपादितम्। तेषां सूर्यात् केतु पर्यन्तं नवग्रहाणां लग्नात् व्ययपर्यन्तं द्वादशभावेषु

स्थितिवशात् ग्रहाणां भावफलानुसारेण जातकस्य स्वभावः, प्रकृतिः, कार्यक्षेत्राणि चाचार्यैः प्रतिपादितानि सन्ति ।

## ७.४ मानवजीवने फलितशास्त्रस्योपयोगिता

ज्योतिषशास्त्रस्योपयोगिता प्रसङ्गेऽस्माभिरिदमेव वक्तुं शक्यते, यत् शास्त्रमेतद् मानवजीवनस्य सर्वेषां रहस्यानामुद्घाटनं करोति । अस्माकं जीवने सुखं-दुःखम्-उत्साहः-वृद्धिः-इष्टम्-अनिष्टं वा यत्किञ्चित् अपि सञ्जायते, येन च क्रमेण घटनाक्रमः प्रचलितः तत्सर्वमनेन शास्त्रेण यथार्थरूपेण ज्ञातुं शक्यते । इत्थं शास्त्रस्यास्य प्राथमिकता क्रमेण विशिष्टा खल्वेकोपयोगिता वर्तते । यदिदं शास्त्रं मानवजीवनस्य सर्वेषामङ्गानामवस्थानां च प्रत्यक्षपरोक्षरूपाभ्यां विवेचनं मार्गनिर्दर्शनं च करोति । जन्म-कालेऽऽधानकाले वा शुभाशुभग्रहाणामेकः खलु विशिष्टः प्रभावो मानवमस्तिष्के तस्य मनोवृत्तीनां प्रवृत्तेश्च सुनिश्चितं रूपं करोति । मानवसमाजस्य समक्षे दर्शनं भौतिकविज्ञानं वा नैराश्यवादस्य धूमिलरेखामङ्कयति। तत्र दैहिक-दैविक-आध्यात्मिकादिदुःखानां वर्णनं दृष्ट्वा मनुष्यो निराशावादी वा संजायते, किन्तु ज्योतिषशास्त्रस्यैका विशेषताऽस्ति यच्छास्त्रमिदं भूत-भविष्य-वर्तमानकाले घटनाक्रमस्य परिचयं दत्वा जनं स्वकर्त्तव्यमनुष्ठातुं प्रेरयति । अतएव स्वकर्त्तव्य सम्पादनार्थं पौरुषसाधनार्थं च ज्योतिषशास्त्रस्य महती उपयोगिता वर्तते ।

## ७.५ षोडशवर्गाणां सामान्यफलविचारः

ग्रहाणां बलाबलविचारप्रसङ्गे बृहत् पाराशरहोराशास्त्रे षडवर्गाणां षोडशवर्गाणां च चर्चा कृतास्ति । तत्र क्रमशः १ गृहम्, २ होरा, ३ द्रेष्काणः, ४

चतुर्थांशः, ५ सप्तमांशः, ६ नवमांशः, ७ दशमांशः, ८ द्वादषांशः, ९ षोडशांशः, १० विंशांशः, ११ चतुर्विंशांशः, १२ सप्तविंशांशः, १३ त्रिंशांशः, १४ खवेदांशः, १५ अक्षवेदांशः, १६ षष्ठ्यंशः इति । यथा-

**वर्गान् षोडश यत्प्राह ब्रह्मा लोकपितामहः ।**

**तदहं सम्प्रवक्ष्यामि मैत्रेय श्रूयतामिति ।।**

**क्षेत्रं होरा च द्रेष्काणास्तुर्यांशः सप्तमांशकः ।**

**नवांशो दशमांशश्च सूर्यांषः षोडशांशकः ।।**

**विंशांशो वेदवाह्वंशो भांशस्त्रिंशांशकस्ततः ।**

**खवेदांशोक्षवेदांशः षष्ठ्यंशश्च ततः परम् ।।**

सूत्रं- गृह-होरा-द्रेष्काण-नवांश-द्वादशांश-त्रिंशांशाः षड्वर्गाः ।

सूत्रं- षड्वर्गा एव सप्तमांशसहिताः सप्तवर्गाः । यद्यपि अत्र मया षड्वर्गाणां पृथक् वर्णनं नैव कृतं कारणं यत् षोडशवर्गेषु तेषां समावेशो भवत्येव, अतः पिष्टपेषणं न स्यात्तदर्थं प्रकरणेऽस्मिन् षोडशवर्गाणामेव वर्णनं विहितम् ।

### ७.५.१ होरावर्गः

"होरा" नाम जन्मकुण्डल्याः १/२ (अर्धांशः/पञ्चाशत्प्रतिशतं)भागः भवति । अर्थात् प्रत्येकराशौ द्वे होरे भवतः । "समेचन्द्रार्कयो विषमे व्यत्ययेन होरा" विषमराशिषु (१,३,५,७,९,११( पञ्चदशांशपर्यन्तं सूर्यस्य होरा भवति तत्पश्चात् चन्द्रस्य । एवमेव समराशिषु (२,४,६,८,१०,१२) पञ्चदशांशपर्यन्तं चन्द्रस्य होरा

तत्पश्चात् सूर्यस्य होरा भवति । अनेन जातकस्य सम्पन्नतायाः विचारः कर्तुं शक्यते । जातकः कियत् परिमितां समृद्धिं सम्पत्तिं च प्राप्स्यति इत्यपि ज्ञानं होरा द्वारैव भवति । अस्य प्रत्येकभागस्य 'मानं' १५० (अंशाः) भवन्ति । अत्र तालिकया स्पष्टं क्रियते । राशेः अर्धभागः होरा उच्यते, तस्मात् चतुर्विंशातिः 'होरा' वर्तन्ते ।

होराविभागः

| | मेषः | वृषभः | मिथुनम् | कर्कः | सिंहः | कन्या | तुला | वृश्चिकः | धनुः | मकरः | कुम्भः | मीनः |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| सूर्यः ०-१५ | ५ | ४ | ५ | ४ | ५ | ४ | ५ | ४ | ५ | ४ | ५ | ४ |
| चन्द्रः १६-३० | ४ | ५ | ४ | ५ | ४ | ५ | ४ | ५ | ४ | ५ | ४ | ५ |

| विषमराशयः | समराशयः |
|---|---|
| १,३,५,७,९,११ | २,४,६,८,१०,१२ |

०० थ १५० (अंशपर्यन्तं)सिंहहोरा-सूर्यहोरा, १५० तः ३०० (अंशपर्यन्तं) सिंहहोरा सूर्यहोरा ।

०० थ १५० (अंशपर्यन्तं)कर्कहोरा-चन्द्रहोरा १५० तः ३०० (अंशपर्यन्तं) कर्कहोरा-चन्द्रहोरा । सूर्यहोरादेवता- देवाः सन्ति । चन्द्रहोरा देवता- पितृगण: । होरायाः फलं निम्नाङ्कितं वर्णितम् । यथा-

**ओजे क्रूरेऽर्कहोरां गतवति बलवान् क्रूरवृत्तिर्धनाढ्यो**

**युग्मे चान्दी शुभेषु द्युतिविनयवचो हृद्यसौभाग्ययुक्तः ।**

**व्यस्तं व्यस्तेऽत्र मिश्रे समफलमुदितं लग्नचन्द्रौ बलिष्ठौ**

**तन्नाथौ द्वौ च तद्वद्यदि भवति चिरं जीव्यदुःखी यशस्वी ।।**

अर्थात् यस्य जातकस्य जन्मकुण्डल्यां विषमराशौ क्रूरग्रहाः सूर्यस्य होरायां भवन्ति तदा मनुष्यः बलवान्, क्रूरवृत्तियुक्तो, धनाढ्यो च भवति। तद्विपरीतस्थितौ शुभग्रहाः समराशौ चन्द्रस्य होरायां तिष्ठन्ति तदा जातको नम्र:, विनयशील:, आनन्दी, प्रीतियुक्तो, प्रतिभावान् तथा च भाग्यवान् भवति । उपर्युक्तस्थितौ विपरीतावस्थायां विपरीतं फलमवाप्यते जातकः । यदि समस्थितिः स्यात्तदा समानं (मिश्रं)फलमवाप्नोति जातकः । तदुपरि यस्य जन्मकुण्डल्यां लग्नम्, चन्द्रः, लग्नेशः तथा राश्यधिपतिः बलयुक्ताः भवन्ति सः जातकः दीर्घायुर्भूत्वा दुःखव्याधिरहितः यशस्वी च भवति।

**७.५.२ द्रेष्काणवर्गः**

द्रेष्काणवर्गः नाम लग्नकुण्डल्याः १/३ (तृतीयांश)भागः अस्ति । अनया द्रेष्काणकुण्डल्या जातकस्य भ्रातृ-भगिन्यादीनां सुखदुःखादि कियत् प्राप्तं स्यात् । भ्रातृ-भगिन्योः सुखं प्राप्तं स्याद् न वेति अथवा तेभ्यः दुःखं एव प्राप्तं स्यात् इति विचारः अनेन वर्गेण कर्तुं शक्यते । प्रत्येकस्य भागस्य मानं १०० भवति । द्वादशराशीनां षट्त्रिंशत् 'द्रेष्काणः' भविष्यति । "दृक्काणाः स्युः स्वभवनसुतत्रित्रिकोणाधिपानाम् ।" स्वेषु नवर्क्षेशा द्रेष्काणपाः ।

द्रेष्काणतालिका

चरद्रेष्काणदेवता-नारदः, स्थिरद्रेष्काणदेवता-अगस्तिः, द्विस्वभावद्रेष्काण-देवतादुर्वासाः ।

मेषः वृषभः मिथुनम् कर्कः सिंहः कन्या तुला वृश्चिकः धनुः मकरः कुम्भः मीनः

| | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| ०-१० | १ | २ | ३ | ४ | ५ | ६ | ७ | ८ | ९ | १० | ११ | १२ |
| ११-२० | ५ | ६ | ७ | ८ | ९ | १० | ११ | १२ | १ | २ | ३ | ४ |
| २१-३० | ९ | १० | ११ | १२ | १ | २ | ३ | ४ | ५ | ६ | ७ | ८ |

**द्रेष्काणपो यत्र गृहे तदङ्का सहजाः सहोत्था स यदा ससौम्यः ।**

**ते जीविनोऽथेतरथा मृताः स्युस्तत्सौहृदाद्ये सहजैः सुखाद्यम् ।।**

अर्थात् जन्मलग्नस्य द्रेष्काणेशः जन्मकुण्डल्यां यस्मिन् राशौ स्थास्यति तस्मिन्नाशिसंख्या तुल्यभ्रातृणां संख्या भवति । तथा च यदि द्रेष्काणेशः सौम्यग्रहयुक्तो वा दृष्टः स्यात् तदा जातकस्य भ्रातरः चिरञ्जीविनः भवन्ति, वैपरीत्यस्थितौ परिस्थितिरापि वैपरीत्य एव भवति । 'तत्सौहृदाद्ये' अर्थात् लग्नेशस्य द्रेष्काणेन सह यादृशी मैत्री भवेत् तद्ववत् भ्रातृसुखं वर्णनीयम् । अथवा द्रेष्काणेन सह युक्तग्रहाणां मैत्रीतुल्यं भ्रातृणां सुखं कथनीयम् इति ।

**चेत् पुं ग्रहास्ते सहजा भगिन्यः स्युः स्त्री-ग्रहाश्चेदथवा पुमङ्गम् ।**

**चेद् भ्रातृ-सौख्यं भगिनी-सुखं तद्भेदे स्व धातोऽरिमृतौ तदीशे ।।**

अर्थात् जन्मलग्नस्य द्रेष्काणेशयुक्तग्रहः पुरुषसंज्ञकः स्यात् तदा भ्रातरः एवं च स्त्रीसंज्ञके ग्रहे भगिन्यः भवन्ति । तथा यदि 'तद्भेदे' अर्थात् स्त्रीसंज्ञकलग्नम्, लग्नेशस्य द्रेष्काणेशस्य च मैत्री स्यात् तदा भगिनीनां सुखमवाप्यते जातकः । द्रेष्काणेशे षष्ठाष्टमस्थाने स्थिते सति स्वघातयोगो भवति ।

### ७.५.३ नवांशवर्गः

अयं नवांशवर्गः लग्नकुण्डल्याः १/९तमः भागः वर्तते। अनेन वर्गेण जातकस्य भार्याविषये सर्वं ज्ञातुं शक्यते। पत्नी कीदृशी लभेत ? इति। जीवनसङ्गिनीविषये अनेन वर्गेण ज्ञातं भवति। अहं मन्ये यत् सर्वेषु वर्गेषु ‘नवांशवर्ग’स्य अधिकाधिकं महत्त्वमस्ति, कारणं यत् “यदा सूपः समीचीनः तदा दिवसः समीचीनः, आचारः मधुरः तदा वर्षं मधुरं एवञ्च भार्या मधुरा तदा जीवनमपि मधुरम्” इति कथ्यते चेत् अतिशयोक्तिः नास्ति । तेनैव कारणेन मयापि नवांशवर्ग-आधारितशोधविषयः स्वीकृतः । अस्य प्रत्येकभागस्य मानं ३० (अंशाः) २०कलाः भवति । एकादशमांशः- ३०/१० अर्थात् ३ अंशस्य भवति। मेष-सिंह-धनुराशिषु प्रथमो नवांशो मेषात्प्रारभ्यते, वृषकन्यामकरराशिषु प्रथमो नवांशो मकरात्प्रारभ्यते, मिथुनतुलाकुम्भराशिषु प्रथमो नवांशस्तुलातः प्रारभ्यते तथा च कर्कवृश्चिकमीनराशिषु प्रथमो नवांशः कर्कात्प्रारभ्यते। चरराशिनां प्रथमो नवांशः स्थिरराशीनां मध्यमो नवांशः, तथा च द्विस्वभावराशीनामन्तिमो नवांशो वर्गोत्तमनवांशः कथ्यते । “चरभे स्वस्मात्, स्थिरे नवमभात् । द्विस्वभावे पञ्चमभान्नवांशाः।”

नवांशतालिका

| | मेषः | वृषभः | मिथुनम् | कर्कः | सिंहः | कन्या | तुला | वृश्चिकः | धनुः | मकरः | कुम्भः | मीनः |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| ३/२० | ५ | १० | ७ | ४ | १ | १० | ७ | ४ | १ | १० | ७ | ४ |
| ६/४० | २ | ११ | ८ | ५ | २ | ११ | ८ | ५ | २ | ११ | ८ | ५ |
| १०/०० | ३ | १२ | ९ | ६ | ३ | १२ | ९ | ६ | ३ | १२ | ९ | ६ |
| १३/२० | ४ | १ | १० | ७ | ४ | १ | १० | ७ | ४ | १ | १० | ७ |
| १६/४० | ५ | २ | ११ | ८ | ५ | २ | ११ | ८ | ५ | २ | ११ | ८ |
| २०/०० | ६ | ३ | १२ | ९ | ६ | ३ | १२ | ९ | ६ | ३ | १२ | ९ |
| २३/२० | ७ | ४ | १ | १० | ७ | ४ | १ | १० | ७ | ४ | १ | १० |

| | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| २६/४० | ८ | ५ | २ | ११ | ८ | ५ | २ | ११ | ८ | ५ | २ | ११ |
| ३०/०० | ९ | ६ | ३ | १२ | ९ | ६ | ३ | १२ | ९ | ६ | ३ | १२ |

**यस्य क्षेत्रस्य यो भागो बल्यंशस्तद् बलान्मतः ।**

**अबलस्तस्य दौर्बल्ये मध्यमे मध्यमः स्मृतः ।।**

नवांशराशेः बलं राशिबलादधिकं भवति । किन्तु राशिदौर्बल्यवशात् नवांशमपि निर्बलं भवति । यदि राशीः मध्यमबलयुक्तः स्यात् तदा नवांशमपि मध्यमबलं युक्तं कथनीयम् ।

**नवांशनाथे स्वलवे स्वभादौ शुभे क्षिताढ्येऽशुभयोगहीने ।**

**प्राप्नोति रामामतुलामवश्यं नरो विनयासमपापरूपाम् ।।**

अर्थात् नवांशेशः स्वनवाशे अथवा स्वराशौ वा स्वोच्चराशौ वा स्वोच्चद्रेष्काणादिषु शुभग्रहेण दृष्टो युक्तो वा भूत्वा अशुभसम्बन्धरहितो भवेत् तदा सः जातकः अतुलगुणयुक्तस्त्ररीं वोत्तमस्वभावयुक्तस्त्रीमवाप्नोति पुरुषार्थं विनापि ।

**केन्द्रे तदीशेऽष्टिसमान्तरिष्टे त्रिकोणगे तत्त्वमितेविवाहः ।**

**नवांशलग्ने खल-खेट-युक्ते जाया-लवे वा न विवाहसौख्यम् ।।**

अर्थात् नवांशेशो बलयुक्तो भूत्वा जन्मकुण्डल्यां केन्द्रे तिष्ठति तदा कुमारावस्थायामेव(१६ वर्षे) विवाहो भवति । यदि स एव नवांशेशो बलयुक्तो भूत्वा त्रिकोणे स्यात् तदा २५ वर्षे अर्थात् युवावस्थायां विवाहो भवति । केन्द्र-त्रिकोणातिरिक्तान्यस्थानेषु नवांशे सति दीर्घकालपर्यन्तं वैवाहिकसुखं नैवोपलभ्यते नरः अर्थात् बहुकाले व्यतीते सति विवाहो जायते । किन्तु नवांशेशः पापग्रहयुक्तो वा दृष्टो भवेत् वा पापग्रहैः सह योगयुक्तो स्यात्तदा वैवाहिकं सुखं न लभ्यते जातकः।

### ७.५.४ सप्तमांशवर्गः

अयं सप्तमांश: कुण्डल्याः १/७तमो भागः अस्ति । “विषमे स्वस्मात् समे सप्तमात्सप्तमांशः ।” अनेन सप्तमांशेन जातकस्य पुत्र-पौत्रादिविषये ज्ञानं कर्तुं शक्यते, अर्थात् पुत्र-पौत्रादीनां सुखं कीदृशं ? पुत्रः स्यात् न वा ? स्यात् तदा कीदृशः ? इति सर्वः विचारः, सर्वं ज्ञानं अनेन सप्तमांशेन भवतीति कथनम् । अस्य प्रत्येकस्य भागस्य मानं ४० (अंशाः) १७’(कलाः) ८’(विकलाः) भवति ।

सप्तमांशतालिका

| | मेषः | वृषभः | मिथुनम् | कर्कः | सिंहः | कन्या | तुला | वृश्चिकः | धनुः | मकरः | कुम्भः | मीनः |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| ४/७/१८ | १ | ८ | ३ | १० | ५ | १२ | ७ | २ | ९ | ४ | ११ | ६ |
| ८/३४/१६ | २ | ९ | ४ | ११ | ६ | १ | ८ | ३ | १० | ५ | १२ | ७ |
| १२/५१/२६ | ३ | १० | ५ | १२ | ७ | २ | ९ | ४ | ११ | ६ | १ | ८ |
| १७/८/३४ | ४ | ११ | ६ | १ | ८ | ४ | १० | ५ | १२ | ७ | २ | ९ |
| २१/२५/४३ | ५ | १२ | ७ | २ | ९ | ५ | ११ | ६ | १ | ८ | ३ | १० |
| २५/४२/५१ | ६ | १ | ८ | ३ | १० | ६ | १२ | ७ | २ | ९ | ४ | ११ |
| ३०/००/०० | ७ | २ | ९ | ४ | ११ | ७ | १ | ८ | ३ | १० | ५ | १२ |

**सप्तांशलग्ने विषमे शुभानां योगे क्षणादौ पुमपत्यसौख्यम् ।**

**समेसुतासंकलितोऽथ तत्रा सौम्यैरसंभूतिमुशन्ति सन्तः ।।**

यदि सप्तांशलग्नं विषमं भवेत् तथा च तत्र शुभग्रहः स्थितो वा दृष्टो भवेत् तदा जातको पुत्रसुखमवाप्नोति, समलग्ने कन्या सुखं लभते । यदि पापग्रहैर्युक्तो दृष्टो वा भवेत् तदा जातको सन्तानसुखरहितो भवतीति महापुरुषाः वदन्ति ।

समराशयः विषमराशयः

२,४,६,८,१०,१२ १,३,५,७,९,११

(शुद्धजल-दधि क्षार, क्षीर, दधि, आज्य, इक्षुरस, मधु, शुद्धजल)

### ७.५.५ दशांशवर्गः

अयं दशांशवर्गः लग्नकुण्डल्याः १/१०तमो भाग भवति। अनेन दशांशवर्गेण जातकस्य व्यवसायविषये, व्यापारविषये च ज्ञातं भवति। अस्य प्रत्येकभागस्य मानं ३ जायते । विषमराशिदेवः-इन्द्र-अग्नि-यम-राक्षस-वरुण-मारुत-कुबेर-ईशान-ब्रह्मा-अनन्त। समराशिदेवः – अनन्त-ब्रह्मा-ईशान-कुबेर-मारुत-मरुन-राक्षस-यम-अग्नि-इन्द्र।

दशांशतालिका

| | मेषः | वृषभः | मिथुनम् | कर्कः | सिंहः | कन्या | तुला | वृश्चिकः | धनुः | मकरः | कुम्भः | मीनः |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| ३ | १ | १० | ३ | १२ | ५ | २ | ७ | ४ | ९ | ६ | ११ | ८ |
| ६ | २ | ११ | ४ | १ | ६ | ३ | ८ | ५ | १० | ७ | १२ | ९ |
| ९ | ३ | १२ | ५ | २ | ७ | ४ | ९ | ६ | ११ | ८ | १ | १० |
| १२ | ४ | १ | ६ | ३ | ८ | ५ | १० | ७ | १२ | ९ | २ | ११ |
| १५ | ५ | २ | ७ | ४ | ९ | ६ | ११ | ८ | १ | १० | ३ | १२ |
| १८ | ६ | ३ | ८ | ५ | १० | ७ | १२ | ९ | २ | ११ | ४ | १ |
| २१ | ७ | ४ | ९ | ६ | ११ | ८ | १ | १० | ३ | १२ | ५ | २ |
| २४ | ८ | ५ | १० | ७ | १२ | ९ | २ | ११ | ४ | १ | ६ | ३ |
| २७ | ९ | ६ | ११ | ८ | १ | १० | ३ | १२ | ५ | २ | ७ | ४ |
| ३० | १० | ७ | १२ | ९ | २ | ११ | ४ | १ | ६ | ३ | ८ | ५ |

### ७.५.६ द्वादशांशवर्गः

द्वादशांशवर्गः जन्मकुण्डल्याः १/१२तमः भागः अस्ति। अनेन द्वादशांशवर्गेण माता-पित्रोः सर्वविधिसुखविचारः भवति । केचन जनानां माता-पितरौ बाल्यावस्थायां एव परधाम्नि गच्छतः अर्थात् बाल्यावस्थायाम् एव तयोः

छत्रछायावियुक्तः जनः भवति इत्यपि विचारः अनेन द्वादशांश वर्गेण क्रियते। अस्य प्रत्येकभागस्य मानं २०.३० भवति । "स्वभात् द्वादशांशाः" अर्थात् द्वादशांशस्वामी सर्वराशिषु क्रमेण स्वराश्यादेव भवन्ति ।

द्वादशांशतालिका

| | मेषः | वृषभः | मिथुनम् | कर्कः | सिंहः | कन्या | तुला | वृश्चिकः | धनुः | मकरः | कुम्भः | मीनः |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| २/३० | १ | २ | ३ | ४ | ५ | ६ | ७ | ८ | ९ | १० | ११ | १२ |
| ५/०० | २ | ३ | ४ | ५ | ६ | ७ | ८ | ९ | १० | ११ | १२ | १ |
| ७/३० | ३ | ४ | ५ | ६ | ७ | ८ | ९ | १० | ११ | १२ | १ | २ |
| १०/० | ४ | ५ | ६ | ७ | ८ | ९ | १० | ११ | १२ | १ | २ | ३ |
| १२/३० | ५ | ६ | ७ | ८ | ९ | १० | ११ | १२ | १ | २ | ३ | ४ |
| १५/० | ६ | ७ | ८ | ९ | १० | ११ | १२ | १ | २ | ३ | ४ | ५ |
| १७/३० | ७ | ८ | ९ | १० | ११ | १२ | १ | २ | ३ | ४ | ५ | ६ |
| २०/० | ८ | ९ | १० | ११ | १२ | १ | २ | ३ | ४ | ५ | ६ | ७ |
| २२/३० | ९ | १० | ११ | १२ | १ | २ | ३ | ४ | ५ | ६ | ७ | ८ |
| २५/० | १० | ११ | १२ | १ | २ | ३ | ४ | ५ | ६ | ७ | ८ | ९ |
| २७/३० | ११ | १२ | १ | २ | ३ | ४ | ५ | ६ | ७ | ८ | ९ | १० |
| ३०/० | १२ | १ | २ | ३ | ४ | ५ | ६ | ७ | ८ | ९ | १० | ११ |

**अर्कांशपेऽङ्गे पितृतुल्यभाग्यस्त्रीकस्थितेनात्मसुखं न पित्रोः ।**

**लाभस्थिते तातधनं सुगुप्तं नीचास्तपापारिखलेष्वभद्रम् ।।**

द्वादशांशाधिपतिः यदि जन्मकुण्डल्यां लग्नस्थो भवति तदा जातको पितृतुल्यो भाग्यवान् भवति, यदि यदि त्रिकस्थाने भवेत् तर्हि जातकः स्वशरीरसुखं, मातृ-पितृसुखं वा नैवोपलभ्यते । यदि द्वादशांशेषो लाभभवने स्थोतो भवति तदा जातको पितुः गुप्तधनमवाप्नोति वा गुप्तधनस्योपभोगं करोति । यदि जन्मकुण्डल्यां

द्वादशांशलग्नं नीचग्रहेण, अस्तग्रहेण वा शत्रुग्रहेण युक्तं दृष्टं वा भवेत् तदा पितरौ कृते हानिपदं क्लेशाद्यनेकानि अशुभफलानि प्राप्नोति जातकः ।

### ७.५.७ षोडशांशवर्गः

अयमपि लग्नकुण्डल्याः १/१६तमो भागः भवति । अनेन वर्गेण जातकस्य वाहनादिसुखविचारः कर्तुं शक्यते । वाहनसुखं प्राप्तं भवेद् न वा ? इति हस्ति-अश्व-आधुनिकवाहनादीनां विचारः । सर्वेषां जीवने वाहनस्यापि महत्त्वं वर्तते, आधुनिकयुगे तु प्रायः जीवनस्य अर्धसमयः वाहनस्योपरि एव व्यतीतो भवति अर्थात् वाहनं योग्यं स्यात् तदा जीवने अधिकाधिकं शान्तिः सुखं च स्यात् । अस्य प्रत्येकभागस्स्य मानं १०.५२'.३०' भवति । विषमराशयः- देवः- ब्रह्मा, विष्णुः, शिवः, सूर्यः । समराशयः- देवः- सूर्यः, शिवः, विष्णुः, ब्रह्मा ।

षोडशांशतालिका

| | १.४.७.१० | २.५.८.११ | ३.६.९.१२ |
|---|---|---|---|
| १.५२.३० | १ | ५ | ९ |
| ३.४५.०० | २ | ६ | १० |
| ५.३७.३० | ३ | ७ | ११ |
| ७.३०.०० | ४ | ८ | १२ |
| ९.२२.३० | ५ | ९ | १ |
| ११.१५.०० | ६ | १० | २ |

| | | | |
|---|---|---|---|
| १३.०७.३० | ७ | ११ | ३ |
| १५.०७.०० | ८ | १२ | ४ |
| १६.१५.३०९ | १ | ५ | |
| १८.४५.०० | १० | २ | ६ |
| २०.३७.३० | ११ | ३ | ७ |
| २२.३०.०० | १२ | ४ | ८ |
| २४.२२.३० | १ | ५ | ९ |
| २६.१५.०० | २ | ६ | १० |
| २८.०७.३० | ३ | ७ | ११ |
| ३०.००. | ४ | ८ | १२ |

### ७.५.८ त्रिंशांशवर्ग:

अयं जन्मकुण्डल्याः (लग्नकुण्डल्याः) १/३०तमः भागः अस्ति । अनेन जातकस्य अभीष्ट/अरिष्टविचारः भवति । अस्य त्रिंशांशवर्गस्य प्रत्येकभागस्य मानं १० भवति । "समे शुक्रज्ञेज्यार्किकुजानां पन्चाद्यष्टशरेषवस्त्रिंशांशाः विषमेन्यथा ।"

विषमराशिअधिदेवाः- अग्नि-वायु-इन्द्र-कुबेर-वरुणः १,३,५,७,९,११

समराशि-अधिदेवाः- वरुण-कुबेर-इन्द्र-वायु-अग्निः २,४,६,८,१०,१२

अंशः विषमराशिः स्वामी समराशिः अंशः

| मे.मि.सिं.तु.ध.कु. | | | | वृ.क.कन्या.वृश्चि.म.मी. | |
|---|---|---|---|---|---|
| ५० | मङ्गलः (१) | अग्निः | मेघः | शुक्रः (२) | ५० |
| १०० | शनिः (११) | वायुः | कुबेरः | बुधः (६) | १२० |
| १८० | गुरुः (९) | इन्द्रः | इन्द्रः | गुरुः (१२) | २०० |
| २५० | बुधः (३) | कुबेरः | वायुः | शनिः (१०) | २५० |
| ३०० | शुक्रः (७) | मेघः | अग्निः | मङ्गलः (८) | ३०० |

**त्रिंशांशादष्टमस्थानाधिपे सौम्यशुभेक्षिते ।**

**शुभैः त्रिंशांशके मृत्युः शोभनो नो विपर्यये ।।**

त्रिंशांशलग्ने अष्टमेशो यदि शुभग्रहो भवेत् तथा शुभग्रहेण दृष्टो भवेत् एवञ्च त्रिंशांशेऽपि शुभग्रहस्य स्थितिर्भवेत् तदा जातकस्य मृत्युः सुखेन शुभश्च भवति । तद्विपरीते विपरीतं फलं वर्णनीयम् ।

**त्रिंशांशपोऽसौम्य खगोऽस्तनीचो यदा तदा बन्धुभिराशुवैरम् ।**

**त्रिक् स्थितश्चेन्नृपभीतिभाक् स्यात्सदन्वितः सन्यदिसौख्यशाली ।।**

त्रिंशांशेशो पापग्रहो, अस्तो वा नीचस्थो भवेत् तर्हि जातकस्य भ्रातृणां, बन्धूनां पित्रादिकानां साकं निष्कारणमेव विरोधो जायते । यदि त्रिंशांशेशो त्रिकस्थाने भवेत् तदा जातको राजभयमवाप्नोति । यदि स एव शुभग्रहो वा युक्तो वा दृष्टो भवेत् तदा जातको सर्वथैव सुखमवाप्नोति ।

**स्व-त्रिंशांशगता ग्रहा विदधते तत्कारकत्वोदितम् ।**

**तत्रैकोऽपि सुहृद् गृहेक्षितयुतः स्वोच्चेऽर्थयुक्तं नृपम् ।।**

स्वत्रिंशांशस्थितग्रह: यस्य कारको भवति तस्य पूर्णं फलं प्रददाति । स्वत्रिंशांशस्थित-एकोऽपि ग्रहो यदि स्वगृही अथवा उच्चस्थो भवति अथवा मित्रग्रहदृष्टो युक्तो वा स्यात् तदा जातको धनसम्पन्नो भूत्वा नृपतुल्यं सुखमवाप्नोति तद्विपरीते विपरीतं फलमवाप्नोति ।

### ७.५.९ षष्ठ्यंशाधिपतयः

एतान् मुख्यचर्चितान् वर्गान् विहाय अन्येऽपि सन्ति ते यथा- भावकुण्डली, सूर्यकुण्डली, चतुर्थांशवर्गः, पञ्चमांशवर्गः, अष्टमांशवर्गः, एकादशांशवर्गः, विंशांशवर्गः, चतुर्विंशांशवर्गः, सप्तविंशांशवर्गः, खवेदांशवर्गः, अक्षवेदांशवर्गः इत्यादिः । षड्वर्गीयलग्नहोरा- द्रेष्काण-नवमांश-द्वादशांश-त्रिंशांश-सप्तवर्गीय-लग्न-होरा-द्रेष्काण-नवमांश-द्वादशांश-त्रिंशांश-सप्तमांश: । दशवर्गीय- लग्नः, होरा, द्रेष्काणः, नवांशः, द्वादशांशः, त्रिंशांशः, सप्तमांशः, दशमांशः, षोडशांशः, षष्ट्यंशः । षोडशवर्गीयः- सर्ववर्गाः, इत्यादिभिः अपि फलादेशो भवति ।

यस्मिन् भावे षष्ट्यंशाधिपः स्यात् तस्य भावस्य निःसन्देहः नाशः भवति एवञ्च यस्मिन् षोडशांशाधीशः – शुभग्रहाः भवन्ति तस्य भावस्य पुष्टिः भवेत्, अपि च सः भावः वृद्धिमाप्नोति । सूर्यात् सप्तमस्थाने यः ग्रहः भवति सः ग्रहः अपि पूर्णफलं ददाति ।

### ७.६ षोडशवर्गलग्नेषु विचारणीयतत्तत्पदार्थविशेषनिरूपणम्

**लग्ने धीरश्चिन्तयेद्देहभावं होरा लग्नात्संपदाद्यं सुखं च ।**

**द्रेष्काणाङ्गाद् बन्धुसौख्यं विचिन्त्यं सप्तांशाङ्गात् संततेः स्याद्विचारः ।।**

**कलत्र सौख्यादिनवांशलग्नात् विलोक्यमर्कांशकतोऽत्र पित्रोः ।**

**त्रिंशांशकाद्रिष्टफलं च वाच्यं सर्वं विलग्नादपि चिन्तनीयम् ।।**

### ७.७ षोडशवर्गादीनां विशेषफलविचारः

लग्नादिद्वादशभावान् अवलोक्य विंशोपकबलं वीक्ष्य, शुभाशुभनिर्णयः कर्त्तव्यः । विंशोपकबलं नाम स्वगृहस्थितग्रहाणां, उच्चराशौ स्थितग्रहाणां, पूर्णफलं प्राप्यते । किन्तु नीचस्थराशिस्थितग्रहाणां फलं शून्यं लभते । तत्रापि नोच्च-नापि नीच अर्थात् मध्यस्थितियुक्तानां फलविचारः विधेयः । विषमराशयः पुरुषराशयः सन्ति, तथैव समराशयः स्त्रीराशयः सन्ति, तयोरपि फलभेदः भवति इत्यपि विचारणीयम् । यथोक्तं महर्षि पाराशरेण- “ओजयुग्मर्क्षभेदतः” इति ।

सूर्यभौमगुरुग्रहाः सूर्यहोराफलं ददति अपि च चन्द्रशुक्रशनयः ग्रहाः चन्द्रहोरायाः फलम् अर्पयन्ति । तत्र ‘बुधः’ सूर्यचन्द्रयोः उभयोः होराफलं ददाति । होरा-द्रेष्काणादिवर्गाणां मध्यभागे पूर्णफलम्, अन्ते शून्यफलम्, केनापि मध्यवर्तिस्थानेन अनुपातात् फलं ज्ञेयम् । अनेनैव रीत्या चतुर्थांश-नवांश-आदिवर्गेषु फलं चिन्तनीयम् । त्रिंशांशवर्गे सूर्यः भौमफलं चन्द्रमा च शुक्रफलं ददाति । ग्रहाणां उदयास्तविचारः अपि करणीयः । केन्द्र-त्रिकोणाधिपतिः कश्चन एक एव ग्रहः स्यात् तदा सः ‘योगकारक’ग्रहः भवति । सः स्थानानुसारं विशेषफलम् अर्पयति ।

लग्नात् अथवा सूर्यग्रहात् यः नवमभावः भवति तस्मात् नवमभावात् पितृसुखदुःखविचारः विधेयः । येषां विषयाणां विचारः लग्न-चतुर्थ-धन-लाभभावैः विचारणीय-चिन्तनीयविषयाणां विचारः चन्द्रात् प्रथम-चतुर्थ-द्वितीय-नवम-एकादशस्थानेभ्यः अपि कर्त्तव्यः ।

लग्नतृतीयस्थानाभ्यां यो विचारो भवति तत् मङ्गलात् तृतीयस्थानेनापि करणीयः । षष्ठभावेन विचारणीयरोगशत्रुमातुलानां विचारः बुधात् षष्ठस्थानेन अपि कर्त्तव्यः इति । पुत्रविचारः गुरुग्रहात् पञ्चमभावेन ("वागीशात् पञ्चमेशः" इत्यनुसारं), स्त्रीविचारः शुक्रग्रहात् सप्तमभावेन एवञ्च मृत्यु-आयुषोः विचारः शनेः अष्टमभावात् भवति । येन भावेन यस्य विचारः भवति तस्य भावेशद्वारा अपि फलविचारः करणीयः इति । अत्र भिन्न-भिन्नग्रहाणां दशाः अवलोक्य याः दशाः प्रचलन्ति स्म, तदनुसारं भविष्यं विचिन्त्यम् अपि च अत्र दशानुसारेण प्रामुख्येन विंशोत्तरी दशैव ग्राह्या । यथोक्तम्- "दशा विंशोत्तरी चात्र ग्राह्या नाष्टोत्तरी मता ।

अध्यायः – ७ नवांशस्य समीक्षात्मकं मूल्याङ्कनम्

ज्योतिषशास्त्रे नवांशः अत्यन्तमहत्वपूर्णः वर्गः वर्तते । दक्षिणभारते राशिवर्गं तथा नवांशं समानमहत्त्वं धारयतः । उदाहरणानि यथा – जैमिनिपद्धतिः , कालचक्र–दशा- सर्वतोभद्रचक्र, षड्बल वर्गप्रकाशः(लेखकः- मुकुन्दवल्लभशर्मा, प्रकाशक-मोतीलालबनारसीदास, दिल्ली) अत्र २०४ नवांशसूत्राणि सन्ति, नवांशाधारितं गद्यं किदृक् विशालं वर्तते तस्य ज्ञानं तत्रस्थश्लोकाणां समन्वयेन ज्ञायते । ग्रन्थेस्मिन् ३०००सहस्राधिकसंख्याकाः श्लोकाः सन्ति । तदुपरि यवनकालादारभ्य अष्टादशशताब्दिपर्यन्तविविधलेखकैः (मीनाराजा, शम्भुदेवः, कल्याणवर्मा, विद्यानाथः, मन्त्रेश्वरः, विद्यामाधव्यः, ढुण्ढिराजः) नवांशफलज्ञानाय लेखनं कृतमस्ति ।

मन्त्रेश्वरानुसारं बहुनां लेखकानां मतेषु नवांशवर्गपरिणामं राशिवर्गस्य समानमेव भवति । केषाञ्चित् लेखकानां मते नवांशवर्गः – राशिवर्गात्

अत्यधिकं महत्वपूर्ण: वर्तते । यथा – “स्वोच्चे नीचनवांशगे दु:खी नीचे स्वोच्चांशगे सुखी । स्वांशे वर्गोत्तमे भोगी राजयोगी भविष्यति ।।”

सूर्यः मेषराशौ तथा तुलायां नवांशे उच्चतासम्बन्धितशुभफलं न ददाति । तत् विशेषं सूर्यः तुलाराशौ तथा मेषनवांशे अत्यन्तशुभफलं ददाति । चरस्थिरराशयोरन्तिमनवांशेऽवस्थितोऽर्थात् त्रिंशदंशमितैरंशैरवस्थितो ग्रहः निर्बलो भवति । परं च द्विस्वभावराशिषु (मिथुन-कन्या-धनु-मीन) यदि इयमेव स्थितिर्भवेत्तदा ग्रहः वर्गोत्तमत्वात् बली भवति ।

“प्रायो नवांशेऽखिल” तथा “जातकफलं नवांशे” (मानसागरी) अर्थात् जीवनसम्बन्धितः समेऽपि पर्यायानामध्ययनं नवांशे वर्गद्वारा भवति । पदद्वयस्य लेखकमानपटले ४०वर्षादधिकं प्रभावः स्थितः । कालेऽस्मिन् नवांशवर्ग-सम्बन्धितसामग्री लेखकद्वारा बहुभ्यः स्तोत्रेभ्यः एकत्रिता । (मुख्यतः देवकेरलात् तथा नाडीसिद्धान्तात् ) अस्या: सामग्र्याः समन्वयरूपमिदं शोधग्रन्थम् ।

यदि एतेषां नवांशसिद्धान्तानां ध्यानपूर्वकमध्ययनं तथा प्रयोगः क्रियते चेत् जातकस्य जीवनसम्बन्धितघटनानां भ्रमरहितभविष्यकथनं कर्तुं शक्यते । अस्य सन्दर्भे भागप्रथमे व्याख्यापितसिद्धान्तानां ध्यानपूर्वकमध्ययनं तथा कुण्डल्याम् एतेषां सफलप्रयोगः आवश्यकः भवति ।

उपर्युक्तानां लेखकानां वा ग्रन्थकाराणां नवांशफलविषयकज्ञानमेकत्रीकृत्य मया अस्मिन् शोधप्रबन्धे साररूपेण(समासेन) नवांशमीमांसा प्रदर्शिता वर्तते ।

### ७.८ भावफलविचारः

ज्योतिशशास्त्रे जातकस्य प्रमुखग्रन्थेषु द्वादशभावफलं विस्तृतेन यत्र तत्र वर्णितम् । वस्तुतो भावो ज्योतिषशास्त्रस्य एको महत्त्वपूर्णो आधारस्तम्भोऽस्ति । भावं विना राशीनां सूर्यादिग्रहाणां च शुभाशुभफलकथनं फलज्ञानं वा कठिनमेवनापितु असम्भवमेव । भावारम्भेणैव फलारम्भो भवति । भाग्यतुल्यांशे पूर्णभावफलं भवति । भावविरामसन्धौ च फलाभावः कथ्यते ।

**भावप्रवृत्तौ हि फलप्रवृत्तिः पूर्णं फलं भावसमांशकेषु ।**

**ह्रासक्रमाद्भावविरामकाले फलस्य नाशः कथितो मुनीन्द्रैः ।।**

यो यो भावस्तदीशेन दृश्यते युक्तो वा, भावेशः सौम्यैर्दृष्टो युतो वा स्यात्तदा तस्य भावस्य वृद्धिः तथा च पापैर्युतो दृष्टो वा भवेत् तदा स भावं नाशयति । यथा-

**यो यो भावः स्वामि दृष्टो युतो वा सौम्यैर्वा स्यात्तस्य तस्याभिवृद्धिः।**

**पापैरेवं तस्य भावस्य हानिर्निर्दिष्टव्या जन्मतः प्रश्नतो वा ।।**

वैद्यनाथेनापि-

**ये ये भावाः सितज्ञामरगुरुपतिभिः संयुतावीक्षिता वा ।**

**नान्यैर्दृष्टा न युक्ता शुभफलदा मूर्तिभावादिकेषु ।।**

शुभोदयाः राषिवन्तो लग्नादिभावानामीशा तेष्वेव भावेषु स्युस्तथा पापग्रहान्विताः दृष्टाः वा न स्युः तदा स भावो वर्धते । यस्य भावेश(६,८,१२)स्थाने स्यात् एवं (६,८,१२)भवेशाः येषु भावेषु गताः स्युः सः भावोऽपि नश्यते । यदि शुभदृष्टोऽन्यथा फलप्रदाः भवन्ति । यथा-

**नीचस्थो रिपुराशिस्थः खेटोभावविनाशकः ।**

**मूलस्वतुङ्गमित्रस्थो भाववृद्धिकरो भवेत् ।।**

**यद्भावनाथो रिपुरिष्फरन्ध्रेदुःस्थानापो यद्भवनस्थितस्तु ।**

**तद्भावनाशं कथयन्ति तज्ज्ञाः शुभेक्षितश्चेत् फलमन्यथा स्यात् ।।**

एवमेव जातकालङ्कारे- देहाधीशः स पापो व्ययरिपुमृतिगश्चेत्तदा देहसौख्यं

**न स्याज्जन्तोर्निजर्क्षे व्ययरिपुमृतिपस्तत्फलस्यैव कर्ता ।**

**मूर्तौ चेत् क्रूरखेटस्तदनु तनुपतिः स्वीयवीर्येण हीनो**

**नानातङ्काकुलः स्याद् व्रजति हि मनुजो व्याधिमाधिप्रकोपम् ।।**

यस्य भावेशः केन्द्रे, त्रिकोणे, शुभग्रहदृष्टः स्यात् स स्वोच्चादिवर्गे बलीस्यात्तदा स भावः पुष्यते (पुष्टिं गच्छति) । यथा-

**यद्भावलाभधनविक्रमराशियाता यद्भावनाथसुहृदश्च तदुच्चनाथाः ।**

**तद्भावपुष्टिबलमम्बरचारिणस्ते कुर्वन्ति मूढरिपुनीचवर्जिताश्चेत् ।।**

❁ ❁ ❁